# Shri ShoDashi Kavacham

# श्रीषोडशीकवचम्

## Document Information

Text title : ShoDashIkavacham

File name : ShoDashIkavacham.itx

Category : devii, kavacha, dashamahAvidyA, devI

Location : doc_devii

Transliterated by : Sivakumar Thyagarajan shivakumar24 at gmail.com

Proofread by : Sivakumar Thyagarajan, PSA Easwaran

Source : Rudrayamala Tantra

Latest update : March 6, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 6, 2022

*sanskritdocuments.org*

# श्रीषोडशीकवचम्

ॐ श्रीगणेशाय नमः ।
श्रीगुरुभ्यो नमः ।
श्रीदेव्युवाच -
भगवन्देवदेवेश भक्तानुग्रहकारक ।
श्रीमहाषोडशीदेव्याः कवचं वद मे प्रभो ॥ १॥

श्रीभैरव उवाच
अधुना देवि वक्ष्यामि महाश्रीषोडशीमयम् ।
परमार्थाभिधं वर्म श्रीविद्यासारमुत्तमम् ॥ २॥

अस्य श्रीमहाषोडशीकवचस्य शिवऋषिः, पङ्क्तिछन्दः, श्रीमहाषोडशीदेवता ।
कएईल ह्रीं बीजं, हसकहल ह्रीं शक्तिः, सकल ह्रीं कीलकं,
धर्मार्थकाममोक्षार्थे विनियोगः प्रकीर्तिताः ।
अथ ध्यानम् -
सूर्यकोटिसहस्राभां सर्वाभरणभूषिताम् ।
पञ्चवक्त्रां चतुर्बाहुं शिवशक्त्यात्मकां भजे ॥ ३॥

शिरोऽव्यान्मे रमाबीजं वाग्बीजं लोचनेऽवतात् ।
पराबीजं श्रुती पायात् कामबीजं च नासिकाम् ॥ ४॥

कामराजस्तथोष्ठौ मे शक्तिः पायान्मुखं मम ।
वासव्यारदनान्पातु तारं जिह्वां ममावतु ॥ ५॥

शक्तिः कण्ठं तथा पातु रमा स्कन्धौ ममावतु ।
त्र्यक्षं भ्रुवौ सदा पतु धृतिः पतु करौ मम ॥ ६॥

पराबीजं पातु वक्षो लक्ष्मी कुक्षिं ममावतु ।
शिवकूटोऽवतात्पृष्ठं ब्रह्मकूटं तु पार्श्वयोः ॥ ७॥

शक्तिकूटोऽवतान्नाभिं कान्तिकूटो गुदं तथा ।

वायुकूटोऽवताद्धस्तौ शक्तिकूटस्तु जानुतः ॥ ८॥

तारं जङ्घे सदा पातु पादौ शक्तिर्ममावतु ।
परा प्रभातकालेऽव्यात् वाङ्मध्याह्नेऽवताच्च माम् ॥ ९॥

सा सायं पातु सर्वत्र मोहाऽव्यान्मां निशीथके ।

पूर्वादिदिक्षु तारोऽव्यात् वह्निवायोः परावतु ॥ १०॥

जलदुर्भिक्षदारिद्र्यात् शक्तिः पातु ममानिशम् ।
दारापुत्रधनाढ्येभ्यो गजाश्वगृहमण्डलात् ॥ ११॥

पातु मे कमलाबीजं कामः श्रीयोगिनीगणात् ।
वाग्भवं सर्वदा पातु श्रीविद्या सर्वतोऽवतु ॥ १२॥

इतीदं कवचं दिव्यं महाश्रीषोडशीमयम् ।
मूलमन्त्रमयं गोप्यं सर्वाशापरिपूरकम् ॥ १३॥

सर्वश्रेयस्करं नित्यं स्तुतं सिद्धिप्रदं कलौ ।
यः पठेत्साधको नित्यं धत्ते मौनव्रतं शिवे ॥ १४॥

स एव शोडशीपुत्रः कामेश्वरसमप्रभुः ।
श्यामात्मको महाकालरूपो वैरिविमर्दनः ॥ १५॥

बहुपुत्रो रमानाथो मान्त्रिकोत्तमशेखरः ।
इत्येतत्कथितं वर्म महाश्रीशोडशीमयम् ॥ १६॥

विनानेन न सिद्धिः स्यान्ममापि परमेश्वरि ।
गोप्यं गुह्यतमं वर्म मूलमन्त्रमयं परम् ॥ १७॥

परमार्थाभिधं वस्तु गोपयेत्स सदाशिवः ॥

इति श्रीरुद्रयमले तन्त्रे महाषोडशी कवचं सम्पूर्णम् ।
श्रीरस्तु ॥

Encoded by Sivakumar Thyagarajan
Proofread by Sivakumar Thyagarajan, PSA Easwaran

*Shri ShoDashi Kavacham*

pdf was typeset on March 6, 2022

Please send corrections to *sanskrit@cheerful.com*